


# श्री गोदादेवि अष्टोत्तरशतनामावली
# (108 नामावली)

**पंडित सुनील वत्स**

https://astrodisha.com

**Whatsapp No: 7838813444**

**Facebook: https://www.facebook.com/AstroDishaPtSunilVats**

**YouTube Channel : https://www.youtube.com/c/astrodisha**

# Sri Goda Devi Ashtottara Shatanamavali

# श्री गोदादेवि अष्टोत्तरशतनामावली

1) ॐ श्रीरङ्गनायक्यै नमः।
2) ॐ गोदायै नमः।
3) ॐ विष्णुचित्तात्मजायै नमः।
4) ॐ सत्यै नमः।
5) ॐ गोपीवेषधरायै नमः।
6) ॐ देव्यै नमः।
7) ॐ भूसुतायै नमः।
8) ॐ भोगशालिन्यै नमः।
9) ॐ तुलसीकाननोद्भूतायै नमः।
10) ॐ श्रीधन्विपुरवासिन्यै नमः।
11) ॐ भट्टनाथप्रियकर्यै नमः।
12) ॐ श्रीकृष्णहितभोगिन्यै नमः।
13) ॐ आमुक्तमाल्यदायै नमः।
14) ॐ बालायै नमः।
15) ॐ रङ्गनाथप्रियायै नमः।
16) ॐ परायै नमः।
17) ॐ विश्वम्भरायै नमः।
18) ॐ कलालापायै नमः।
19) ॐ यतिराजसहोदर्यै नमः।
20) ॐ कृष्णानुरक्तायै नमः।

पंडित सुनील वत्स

21) ॐ सुभगायै नमः।

22) ॐ सुलभश्रियै नमः।

23) ॐ सुलक्षणायै नमः।

24) ॐ लक्ष्मीप्रियसख्यै नमः।

25) ॐ श्यामायै नमः।

26) ॐ दयाञ्चितदृगञ्चलायै नमः।

27) ॐ फल्गुन्याविर्भवायै नमः।

28) ॐ रम्यायै नमः।

29) ॐ धनुर्मासकृतव्रतायै नमः।

30) ॐ चम्पकाशोकपुन्नाग मालती विलसत्कचायै नमः।

31) ॐ आकारत्रयसम्पन्नायै नमः।

32) ॐ नारायणपदाश्रितायै नमः।

33) ॐ श्रीमदष्टाक्षरी मन्त्रराजस्थित मनोरथायै नमः।

34) ॐ मोक्षप्रदाननिपुणायै नमः।

35) ॐ मनुरत्नाधिदेवतायै नमः।

36) ॐ ब्रह्मण्यायै नमः।

37) ॐ लोकजनन्यै नमः।

38) ॐ लीलामानुषरूपिण्यै नमः।

39) ॐ ब्रह्मज्ञानप्रदायै नमः।

40) ॐ मायायै नमः।

41) ॐ सच्चिदानन्दविग्रहायै नमः।

42) ॐ महापतिव्रतायै नमः।

43) ॐ विष्णुगुणकीर्तनलोलुपायै नमः।

44) ॐ प्रपन्नार्तिहरायै नमः।

पण्डित सुनील वत्स

45) ॐ नित्यायै नमः।

46) ॐ वेदसौधविहारिण्यै नमः।

47) ॐ श्रीरङ्गनाथ माणिक्यमञ्जर्यै नमः।

48) ॐ मञ्जुभाषिण्यै नमः।

49) ॐ पद्मप्रियायै नमः।

50) ॐ पद्महस्तायै नमः।

51) ॐ वेदान्तद्वयबोधिन्यै नमः।

52) ॐ सुप्रसन्नायै नमः।

53) ॐ भगवत्यै नमः।

54) ॐ श्रीजनार्दनदीपिकायै नमः।

55) ॐ सुगन्धावयवायै नमः।

56) ॐ चारुरङ्गमङ्गलदीपिकायै नमः।

57) ॐ ध्वजवज्राङ्कुशाब्जाङ्क मृदुपाद तलाञ्चितायै नमः।

58) ॐ तारकाकारनखरायै नमः।

59) ॐ प्रवालमृदुलाङ्गुल्यै नमः।

60) ॐ कूर्मोपमेय पादोर्ध्वभागायै नमः।

61) ॐ शोभनपार्ष्णिकायै नमः।

62) ॐ वेदार्थभावतत्त्वज्ञायै नमः।

63) ॐ लोकाराध्याङ्घ्रिपङ्कजायै नमः।

64) ॐ आनन्दबुद्बुदाकारसुगुल्फायै नमः।

65) ॐ परमाणुकायै नमः।

66) ॐ तेजःश्रियोज्ज्वलधृतपादाङ्गुलि सुभूषितायै नमः।

67) ॐ मीनकेतनतूणीर चारुजङ्घा विराजितायै नमः।

68) ॐ ककुद्वज्जानुयुग्माढ्यायै नमः।

पंडित सुशील वत्स

69) ॐ स्वर्णरम्भाभसक्थिकायै नमः।

70) ॐ विशालजघनायै नमः।

71) ॐ पीनसुश्रोण्यै नमः।

72) ॐ मणिमेखलायै नमः।

73) ॐ आनन्दसागरावर्त गम्भीराम्भोज नाभिकायै नमः।

74) ॐ भास्वद्वलित्रिकायै नमः।

75) ॐ चारुजगत्पूर्णमहोदर्यै नमः।

76) ॐ नववल्लीरोमराज्यै नमः।

77) ॐ सुधाकुम्भायितस्तन्यै नमः।

78) ॐ कल्पमालानिभभुजायै नमः।

79) ॐ चन्द्रखण्डनखाञ्चितायै नमः।

80) ॐ सुप्रवाशाङ्गुलीन्यस्त महारत्नाङ्गुलीयकायै नमः।

81) ॐ नवारुणप्रवालाभ पाणिदेशसमञ्चितायै नमः।

82) ॐ कम्बुकण्ठ्यै नमः।

83) ॐ सुचुबुकायै नमः।

84) ॐ बिम्बोष्ठ्यै नमः।

85) ॐ कुन्ददन्तयुजे नमः।

86) ॐ कारुण्यरसनिष्यन्द नेत्रद्वयसुशोभितायै नमः।

87) ॐ मुक्ताशुचिस्मितायै नमः।

88) ॐ चारुचाम्पेयनिभनासिकायै नमः।

89) ॐ दर्पणाकारविपुलकपोल द्वितयाञ्चितायै नमः।

90) ॐ अनन्तार्कप्रकाशोद्यन्मणि ताटङ्कशोभितायै नमः।

91) ॐ कोटिसूर्याग्निसङ्काश नानाभूषणभूषितायै नमः।

92) ॐ सुगन्धवदनायै नमः।

93) ॐ सुभ्रुवे नमः।

94) ॐ अर्धचन्द्रललाटिकायै नमः।

95) ॐ पूर्णचन्द्राननायै नमः।

96) ॐ नीलकुटिलालकशोभितायै नमः।

97) ॐ सौन्दर्यसीमायै नमः।

98) ॐ विलसत्कस्तूरीतिलकोज्ज्वलायै नमः।

99) ॐ धगद्धगायमानोद्यन्मणि सीमन्तभूषणायै नमः।

100) ॐ जाज्वल्यमानसद्रत्न दिव्यचूडावतंसकायै नमः।

101) ॐ सूर्यार्धचन्द्रविलसत् भूषणञ्चित वेणिकायै नमः।

102) ॐ अत्यर्कानल तेजोधिमणि कञ्चुकधारिण्यै नमः।

103) ॐ सद्रत्नाञ्चितविद्योत विद्युत्कुञ्जाभ शाटिकायै नमः।

104) ॐ नानामणिगणाकीर्ण हेमाङ्गदसुभूषितायै नमः।

105) ॐ कुङ्कुमागरु कस्तूरी दिव्यचन्दनचर्चितायै नमः।

106) ॐ स्वोचितौज्ज्वल्य विविधविचित्रमणिहारिण्यै नमः।

107) ॐ असङ्ख्येय सुखस्पर्श सर्वातिशय भूषणायै नमः।

108) ॐ मल्लिकापारिजातादि दिव्यपुष्पस्रगञ्चितायै नमः।

**॥ इति श्री गोदादेवि अष्टोत्तरशतनामावली ॥**

**पंडित सुनील वत्स**

Website : https://astrodisha.com

Whatsapp No : +91- 7838813444

Contact No: +91-7838813 - 444 / 555 / 666 / 777

Facebook : https://www.facebook.com/AstroDishaPtSunilVats

YouTube Channel : https://www.youtube.com/c/astrodisha